चक्रवर्त्तिनो गङ्गायां भार्य्यायां जातः। स परम-
धर्म्मात्मा महावीरः। येन पितुर्दासकन्या-
विवाहार्थं पितृराज्यं त्यक्तं, यश्च स्वस्य विवाहं
त्यक्त्वा ऊर्द्धरेता जातः। इति श्रीभागवतम्॥
तस्योत्पत्तिर्यथा,—
"अथ तामष्टमे जाते पुत्त्रे प्रहसतीमिव।
उवाच राजा दुःखार्त्तः परीप्सन् सुतमात्मनः॥
मा वधीः कासि कस्यासि किञ्च हंसि सुता-
निति।
पुत्त्रघ्नि! सुमहत् पापं संप्राप्तं ते सुगर्हिते!॥"
गङ्गोवाच।
"पुत्त्रकाम! न ते हन्मि पुत्त्रं पुत्त्रवतांवर!।
जीर्णस्तु मम वासोऽयं यथा स समयः कृतः॥
अहं गङ्गा जह्नुसुता महर्षिगणसेविता।
देवकार्य्यार्थसिद्ध्यर्थमुषिताहं त्वया सह॥
अष्टौ ये वसवो देवा महाभागा महौजसः।
वशिष्ठशापदोषेण मानुषत्वमुपागताः॥
तेषां जनयिता नान्यस्त्वदृते भुवि विद्यते।
मद्विधा मानुषी धात्री लोके नास्तीह काचन॥
तेषाञ्च जननीहेतोर्मानुषत्वमुपागता।
जनयित्वा वसूनष्टौ जिता लोकास्त्वयाक्षयाः॥
देवानां समयस्त्वेष वसूनां संश्रुतो मया।
जातं जातं मोचयिष्ये जन्मतो मानुषादिति॥
तत्ते शापाद्विनिर्मुक्ता आपवस्य महात्मनः।
स्वस्ति तेऽस्तु गमिष्यामि पुत्त्रं पाहि महा-
व्रतम्॥
एष पर्य्यायवासो मे वसूनां सन्निधौ कृतः।
मत्प्रसूतं विजानीहि गङ्गादत्तमिमं सुतम्॥"
इत्यादिपर्व्वणि भीष्मोत्पत्तिनाम १००अध्यायः॥

भीष्मजननी, स्त्री, (भीष्मस्य जननी माता।)
गङ्गा। इति राजनिर्घण्टः॥

भीष्मपञ्चकं, क्ली, (भीष्मेण कृतमुपदिष्टं वा पञ्चकं
एकादश्यादिपूर्णिमान्तपञ्चतिथिकर्त्तव्यम्।)
कार्त्तिकशुक्लपक्षीयैकादश्यादिपूर्णिमान्तपञ्च-
तिथिकर्त्तव्यव्रतविशेषः। यथा,—
श्रीनारद उवाच।
"भगवन्! यत् त्वया प्रोक्तं भीष्मस्य च दिनं
महत्।
माहात्म्यं श्रोतुमिच्छामि तस्य मे कथय प्रभो!॥
कथं स्नानञ्च किं दानं को विधिः कस्य पूजनम्।
किं फलं केन वाकारि तन्मे कथय विस्तरात्॥"
ब्रह्मोवाच।
तद्भीष्मपञ्चकस्येदं माहात्म्यं विधिपूर्व्वकम्।
वक्ष्यामि फलसंयुक्तं येनेदञ्च कृतं पुरा॥
अयोध्या नगरी या च कलिकल्मषनाशिनी।
वैष्णवी स्वर्गरम्या च कलिकल्मषनाशिनी॥
हस्त्यश्वरथपत्त्याढ्या विष्णुचक्रप्रतिष्ठिता।
तस्यामासीन्नरवरः सूर्य्यवंशोद्भवो मुने!॥
अतिथिर्नाम देवर्षे! धर्म्मात्मा नैकयज्ञकृत्।
तेन दत्तं पुरा राज्ञा कृतं यज्ञमनूत्तमम्॥
भार्य्यया चन्द्रभागिन्या सार्द्धं भीष्मस्य पञ्चकम्।
विशेषैः परिपप्रच्छ वशिष्ठं तद्विधिं द्विज!॥"

वशिष्ठ उवाच।
"शृणु राजन्! प्रवक्ष्यामि व्रतं सौभाग्य-
दायकम्।
रहस्यं भीष्मपञ्चाख्यं विष्णुतुष्टिप्रदायकम्॥
कार्त्तिके मासि राजेन्द्र! प्रारभ्यैकादशीतिथिम्।
यावत् पञ्चदशी रम्या भविता चन्द्रपूर्णिता।
पञ्चभीष्ममिति ख्यातं तिथयः पुण्यदाः स्मृताः॥
प्रातःकाले समुत्थाय शौचं कृत्वा यथाविधि।
स्नात्वा सभार्य्यः पुरुषो नद्यादौ विमले जले॥
तर्पयेद्भीष्मवर्म्माणं कुरुवंशपितामहम्।
पितृभिः सलिलयुक्तैश्च जलाञ्जलिभिराहृतैः॥
वैयाघ्रपद्यगोत्राय साङ्कृतिप्रवराय च।
तिलतोयाञ्जलिं तस्मै प्रयच्छेद्भीष्मवर्म्मणे॥
सन्तर्प्य कौरवश्रेष्ठं कुर्य्यादाचमनं ततः।
अर्च्चयित्वा विधानेन चन्दनादिभिरादृतः।
अर्घ्यं दद्याद्यतात्मा च मन्त्रेणानेन भूपते!॥
वसूनामवताराय शान्तनोरात्मजाय च।
अर्घ्यं ददामि भीष्माय आजन्मब्रह्मचारिणे॥
इत्थं समापयेद्वत्स! भीष्मपञ्चविधिं नरः।
नियमेनोपवासेन पञ्चगव्येन वा पुनः॥
पयोमूलफलाहारैर्हविर्नानाविधैरपि।
नरो वा यदि वा नारी मुक्तपापो दिवं व्रजेत्॥
भुङ्क्ते स विपुलान् भोगान् कार्त्तिकं न
लङ्घेद्धि यः।
अतोऽशक्तो नयेत् पञ्चभीष्माख्यं हरिपूर्णितम्॥
मुक्तिर्भविष्णुभक्तोऽसौ भक्त्या त्वचलया सह।
दम्पती च यथा भीष्मं लब्ध्वा तौ तु महाफलम्॥
स्वस्थायासेन विप्रेन्द्र! कृतं ताभ्यां हि तत् पुरा।
प्राप्तं राज्यं महीमेतां समुद्रवलयान्विताम्॥
प्रभुज्य प्रचुरान् कामान् व्रतकामौ यथा मुने!।
दिव्याम्बराभरणौ तौ दिव्यमाल्यानुलेपितौ॥
दिव्यदेहविमानेन सर्व्वकिन्नरसेवितौ।
अप्सरोगीतनृत्येन स्तुतौ देवमहर्षिभिः।
सम्प्राप्तौ विष्णुलोकञ्च भीष्मपञ्चव्रतात् मुने!॥"
ब्रह्मोवाच।
"इत्येतत् कथितं वत्स! माहात्म्यं कार्त्तिको-
द्भवम्।
भीष्मपञ्चकमाहात्म्यं सेतिहासं पुरातनम्॥
तत् सर्व्वं कुरु विप्रेन्द्र! यदि ते भक्तिरच्युते।
निश्चलः कायमनसा वचसा सुमनोभव॥"
"शृण्वन्ति मर्त्याश्च पठन्ति ये वै
भूखण्डमध्ये भगवद्गुणान् मुने!।
मतिञ्च लब्ध्वा भगवत्प्रवेशतः
कथासुपेन्द्रस्य पुरं प्रयान्ति॥
कलिमलमपहृत्य प्राणिनो देवदेवं
सुभगसकलभोगान् भोजयित्वा च यान्ति।
हरिपुरममरेशैर्गीतवाद्यैर्विशाले-
र्विहितसकलकृत्यास्तोषयन्ते हरिं ये॥
एतत् कार्त्तिकमाहात्म्यं भक्त्या यः शृणुयान्नरः।
सर्व्वपापविनिर्म्मुक्तः स क्रमो लभते रतिम्॥"
इति पाद्मोत्तरखण्डे कार्त्तिकमाहात्म्ये १३२
अध्यायः॥

अपि च।
"सदा हरेर्व्रतं श्रेष्ठं ततः स्याद्दक्षिणायने।
चातुर्म्मास्ये ततस्तस्मात् कार्त्तिके भीष्मपञ्चकम्॥
ततः श्रेष्ठतमं शुक्ला एकादश्यां समाचरेत्।
स्नायात्त्रिकालं पित्रादीन् यवाद्यैरर्च्चयेद्धरिम्॥
यजेन्मौनी घृताद्यैस्तु पञ्चगव्येन वारिभिः।
स्नापयित्वाथ कर्पूरसुखैश्चैवानुलेपयेत्॥
घृताक्तगुग्गुलोर्धूपं द्विजः पञ्चदिनं दहेत्।
नैवेद्यं परमान्नन्तु जपेदष्टोत्तरं शतम्॥
ॐ नमो वासुदेवाय घृतव्रीहितिलोदकम्।
षड़क्षरेण मन्त्रेण स्वाहान्तेन तु होमयेत्॥
प्रथमेऽह्नि हरेः पादौ यजेत् पद्मैर्द्वितीयके।
बिल्वपत्रैर्जानुदेशं नाभिं भृङ्गेण चापरे॥
स्कन्धौ बिल्वैर्जवाभिश्च पञ्चमेऽह्नि शिरोऽर्च्चयेत्।
मालत्या भूमिशायी स्याद्गोमयं प्राशयेत्
क्रमात्॥
गोमूत्रक्षीरदधि च पञ्चमे पञ्चगव्यकम्।
नक्तं कुर्य्यात् पञ्चदश्यां व्रती स्याद्भुक्तिमुक्ति-
भाक्॥"
इति गारुड़े भीष्मपञ्चादिव्रतं नाम १२३अध्यायः॥
वकपञ्चकम्। यथा,—
"आरभ्यैकादशीं पञ्च दिनानि व्रतमाचरेत्।
भगवत् प्रीतये भीष्मपञ्चकं यदि शक्नुयात्॥
तथा धात्रीव्रतं पौर्णमास्यां कुर्व्वीत कार्त्तिके।
तथा नवम्यां शुक्लायामक्षयं नवमीव्रतम्॥
पैतामहादिकृच्छ्राणि मासोपोषणमेव च।
समर्थः कार्त्तिके कुर्य्यात् ज्ञात्वा पाद्मादितो
विधिम्॥"
इति श्रीहरिभक्तिविलासे १६ विलासः॥

भीष्मरत्नं, क्ली, (भीष्मं भयानकं रत्नं दुर्लभत्वात्।)
हिमालयोत्तरदेशजातशुक्लवर्णप्रस्तरविशेषः।
तस्योत्पत्त्यादि यथा,—
सूत उवाच।
"हिमवत्युत्तरे देशे वीर्य्यं पतितं सुरद्विषस्तस्य।
सम्प्राप्तमुत्तमानामाकरतां भीष्मरत्नानाम्॥
शुक्लाः शङ्खाब्जनिभाः स्योनाकसन्निभाः
प्रभावन्तः।
प्रभवन्ति ततस्तस्मा वज्रनिभा भीष्मपाषाणाः।
हिमाद्रिप्रतिबद्धं शुद्धमपि श्रद्धया बिधत्ते यः।
भीष्ममणिं ग्रीवादिषु स सम्पदं सर्व्वदा लभते॥
शुभयुक्तस्य तस्यैव धारणान्मुनिपुङ्गव!।
विषाणि तानि नश्यन्ति सर्व्वाण्येव महीतले॥"
विषमानाबाधन्ते ये तमरण्यनिवासिनः समी-
पेऽपि।
दीपिवृकशरभकुञ्जरसिंहव्याघ्रादयो हिंस्राः॥
तस्योत्कवलितत्वातिनो भवन्ति भयं न चापि
समुपस्थितम्।
भीष्ममणिर्गुणयुक्तः सम्यक् संप्राप्ताङ्गुलित्रितयः।
पितृतर्पणे पितॄणां तृप्तिर्बहुवार्षिकी भवति॥
शाम्यन्त्युद्भूतान्यपि सर्पाखुवृश्चिक-
विषाणि।
सलिलाग्निवैरितस्करभयानि भीमानि नश्यन्ति॥"